श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७९

*रुक्मिणीस्वयंवरवर्णनम्*

बलसमेतबलानुगतो भवान् पुरमगाहत भीष्मकमानितः।
द्विजसुतं त्वदुपागमवादिनं धृतरसा तरसा प्रणनाम सा॥ १ ॥

भुवनकान्तमवेक्ष्य भवद्वपुर्नृपसुतस्य निशम्य च चेष्टितम्।
विपुलखेदजुषां पुरवासिनां सरुदितैरुदितैरगमन्निशा॥ २ ॥

तदनु वन्दितुमिन्दुमुखी शिवां विहितमङ्गलभूषणभासुरा।
निरगमत् भवदर्पितजीविता स्वपुरतः पुरतः सुभटावृता॥ ३ ॥

कुलवधूभिरुपेत्य कुमारिका गिरिसुतां परिपूज्य च सादरम्।
मुहुरयाचत तत्पदपङ्कजे निपतिता पतितां तव केवलम्॥ ४ ॥

समवलोककुतूहलसङ्कुले नृपकुले निभृतं त्वयि च स्थिते।
नृपसुता निरगात् गिरिजालयात् सुरुचिरं रुचिरञ्जितदिङ्मुखा॥ ५ ॥

भुवनमोहनरूपरुचा तदा विवशिताखिलराजकदम्बया।
त्वमपि देव कटाक्षविमोक्षणैः प्रमदया मदयाञ्चकृषे मनाक्॥ ६ ॥

क्वनु गमिष्यसि चन्द्रमुखीति तां सरसमेत्य करेण हरन् क्षणात्।
समधिरोप्य रथं त्वमपाहृथा भुवि ततो विततो निनदो द्विषाम्॥ ७ ॥

क्वनु गतः पशुपाल इति क्रुधा कृतरणा यदुभिश्च जिता नृपाः।
न तु भवानुदचाल्यत तैरहो पिशुनकैः शुनकैरिव केसरी॥ ८ ॥

तदनु रुक्मिणमागतमाहवे वधुमुपेक्ष्य निबध्य विरूपयन्।
हृतमदं परिमुच्य बलोक्तिभिः पुरमया रमया सह कान्तया॥ ९ ॥

नवसमागमलज्जितमानसां प्रणयकौतुकजृम्भितमन्मथाम्।
अरमयः खलु नाथ यथासुखं रहसि तां हसितांशुलसन्मुखीम्॥ १० ॥

विविधनर्मभिरेवमहर्निशं प्रमदमाकलयन् पुनरेकदा।
ऋजुमतेः किल वक्रगिरा भवान् वरतनोरतनोदतिलोलताम्॥ ११ ॥

तदधिकैरथ लाळन कौशलैः प्रणयिनीमधिकं सुखयन्निमाम्।
अयि मुकुन्द भवच्चरितानि नः प्रगदतां गदतान्तिमपाकुरु॥ १२ ॥

**********